Total Pages : 8

K-421

Shastri (Part-I) Examination, 2022

अनिवार्य संस्कृत काव्ये

[तृतीय प्रश्नपत्रम्]

Time Allowed : Three Hours

Maximum Marks : 75

Minimum Passing Marks : 25

निर्देशः– सर्वे प्रश्नाः समाधेयाः –

(व्याख्यात्मको भागः)

1. अधोलिखितेषु श्लोकेषु श्लोकत्रय व्याख्या कार्या – [15]

(क) या सृष्टिः स्रष्टुराद्या वहति विधिहुतं
या हविर्या च हात्री,
ये द्वे कालं विधत्तः श्रूतिविषयकगुणा
या स्थिता व्याप्य विश्वम्।

यामाहुः सर्वबीजप्रकृतिरिति

यया प्राणिनः प्राणवन्तः

प्रत्यक्षाभिः प्रपन्नस्तनुभिरवतु

वस्ताभिरष्टाभिरीशः।।

(ख) चित्रे निवेश्य परिकल्पित सत्त्वयोगा

रूपोच्चयेन मनसा विधिना कृता नु।

स्त्रीरत्नसृष्टिरपरा प्रतिभाति सा मे

धातुर्विभुत्वमनुचिन्त्य वपुश्च तस्याः।।

(ग) अनाघ्रातं पुष्पं किसलयमलूनं कररुहै-

रनाविद्धं रत्नं मधु नवमनास्वादितरसम्।

अखण्डं पुण्यानां फलमिव च तद्रूपमनघं

न जाने भोक्तारं कमिह समुपस्थास्यति विधिः।।

(घ) विचिन्तयन्ती यमनन्यमानसा

तपोधनं वेत्सि न मामुपस्थितम्।

स्मरिष्यति त्वां न स बोधितोऽपि सन्

कथां प्रमत्तः प्रथमं कृतामिव।।

(ङ) यात्येकतोऽस्तशिखरं पतिरोषधीना

भाविष्कृतोऽरूणपुरः सरएकतोऽर्कः।

तेजोद्वयस्य युगपद्व्यसनोदयाभ्यां

लोकोनियम्यत इवात्मदशान्तरेषु।।

(च) यास्यत्यद्य शकुन्तलेति हृदयं संस्पृष्टमुत्कण्ठया

कण्ठः स्तम्भितवाष्पवृत्तिकलुषश्चिन्ताजडंदर्शनम्।

वैक्लव्यं मम तावदीदृशमिदं स्नेहादरण्योकसः

पीड्यन्ते गृहिणः कथं नु तनयाविश्लेषदुःखैनवैः।।

2. महाकवि कालिदासस्य परिचयः प्रस्तूयताम्। [10]

अथवा

काव्येषु नाटकं रम्यं तत्र रम्या शकुन्तलातत्रापि तुर्थोऽङ्कस्तत्रश्लोक चतुष्टयम्। सूक्तिरियं सोदाहरणं प्रस्तूयताम्।

3. अधोलिखितेषु द्वावेव सम्यक् व्याख्यायताम् - [10]

(क) पञ्चम वा तृतीयाङ्कस्य कथासारः

(ख) शकुन्तलायाः चरित्रचित्रणम्

(ग) दुष्यन्तस्य चरित्रचित्रणम्

(घ) महर्षि कणवस्य चरित्रचित्रणम्

4. अधोलिखितेषु द्वावेवश्लोकयोः सप्रसङ्गः व्याख्येयौ - [15]

(क) कश्चित कान्ताविरहगुरुणास्वाधिकारात् प्रमत्तः
शापेनास्तङ्गमितमहिमा वर्ष भोग्येण भर्त्तुः
यक्षश्चक्रे जनकतनयास्नानपुण्योदकेषु
स्निग्धच्छायातरुषु वसतिं रामगिर्याश्रमेषु।।

(ख) जातं वंशे भुवनविदिते पुष्करावर्तकानाम्
जानामि त्वां प्रकृति-पुरुषं कामरूपंमधोनः।
तेनार्थित्त्वं त्वयि विधिवशात् दूरबन्धर्गतोऽहम्
याञ्चा मोधावरमधिगुणे नाधमेलब्धकामा।।

(ग) तां चावश्यं दिवसगणनातत्परामेकपत्नी -
मव्यापन्नामविहतगतिर्द्रक्ष्यसि भातृजायाम्।
आशाबन्धः कुसुमसदृशं प्रायशो ह्यङ्गनानां
सद्यःपाति प्रणयि हृदयं विप्रयोगे रूणद्धि।

5. अधस्तनेषु द्वावेव विलिख्यताम् - [15]

(क) पूर्वमेघस्य कथासारः

(ख) मेघदूतखण्डकाव्यस्य उपजीव्यम्

(ग) मेघदूतखण्डकाव्यस्य नायकस्यस्वरूपम्

(घ) गीतिकाव्यमिति मेघदूतम्

6. लघूत्तरीयाः प्रश्नाः - [5×2=10]

(क) अभिज्ञान शाकुन्तलनाटकस्यकर्ता कः?

(ख) अभिज्ञानशाकुन्तलेकति अङ्का सन्ति?

(ग) काव्यदृष्टया मेघदूतं खण्डकाव्यं वा महाकाव्यम्?

(घ) मेघदूतकाव्यारम्भे मङ्गल सूचक शब्दः कः?

(ङ) यक्षस्य प्रमादस्य कारणं किम्?

----x----